४० / धर्म

पंचकोशी माहात्म्य

/5180

५/१३

8077270

GRAHAM TRADING CO. LTD.
RECEIVED
12 JUL 1926
CALCUTTA.
PIECE GOODS DEPT.

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri



CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

3583 ६/२०१ ६/290 ८७६

अथ पंचकोशीमाहात्म्यं प्रारभ्यते॥

ईश्वर मठ पुस्तकालय

16/12/11

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

श्रीगणेशायनमः॥ श्रीकपिलउवाच॥ एवंसिद्धाः काशिकायांनसेद्यः सर्वैर्द्धर्मैः संयुतः सोतिवंद्यः॥ तस्माद्धर्माः सततंसिद्धिभूमौसंसेव्याः स्युः पापकंनाल्पमत्र॥१॥ यथेधर्माभिमानवैः संप्रयुक्ताः काश्यांतेतान्मोक्षसिद्धिं नयति॥ तस्मात्सिद्धिःसाधयेदात्मकार्यं सद्भिः शास्त्रैश्रद्धयात्यागयोगैः॥२॥ काश्यांकृतानांपापानां पुण्यानांवासमृद्धयः॥ भवंतिसततंनूनंसुक्षेत्रेह्युप्तबीजवत्॥३॥ सिद्धाऊचुः॥ देवदेवारविंदाक्षसांख्य-योगप्रवर्तक॥ कथंमुच्येतमनुजः काश्यामेवकृतैरघैः॥४॥ मोक्षंप्राप्नोतिचकथंकथंवाजीवनेसुखं। आनन्दकाननेह्यस्मिन्कथमानन्दभाग्भवेत्॥५॥ कपिलउवाच॥ इदमेवपुराष्टष्टः पार्वत्याभगवान्भवः पापनाशंधर्मवृद्धिरविलंबेनमोचनं॥६॥ पार्वत्युवाच॥ दीनानाथैकशरणंदेवदेवदयानिधे॥ पाहिलोकान्भवभदेशान्सूक्तैपापप्रणाशनैः॥७॥ आगत्यशीघ्रंयेप्राप्ताः काशींतीर्णाः क्षणेनते॥ येतुस्थित्वासुकृतिन-स्तेपिशीघ्रंपरंगताः॥८॥ पापंकृत्वामृतायेचतेषांमुक्तिः कथंभवेत्॥ कृपयादेवदेवेशशंसायच्छिन्नमशेषतः॥९॥ महादेवउवाच॥ शृणुपार्वतिवक्ष्यामियद्गोप्यंममसर्वतः॥ पुण्यवद्भिः पापवद्भिः कर्त्तव्यंकाशिवासि

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

भिः॥ १०॥ नकोपिदृष्टोमनुजोविनापापंशरीरभाक्॥ कुर्वन्नपिमहापुण्यंपापसंस्कारतश्चरेत्॥ ११॥ देहः
स्वकार्यंकुरुतेइन्द्रियाणिस्वकर्मसु॥ प्रवर्त्ततेवलादेवमनः केन निवार्यते॥ १२॥ प्रायश्चित्तानिकिंतानियैः पुनः
संप्रवर्त्तते॥ मनः शरीरादिपुनः प्रायश्चित्तंनतत्भवेत्॥ १३॥ प्रायश्चित्तत्रयंसूक्ष्ममनुभूतंमहात्मभिः॥ ब्र-
ह्महत्यादिपापानामन्यपापकृतांनुकिं॥ १४॥ काश्यामपिवसन्जंतुर्यदिपापकृदत्रहि॥ प्रायश्चित्तत्रयंकृ-
त्वासद्योमुच्येतवंधनात्॥ १५॥ देव्युवाच॥ आश्चर्यमेतद्भगवन्त्वयानिगदितंविभो॥ वाराणस्यांकृतैःपापैर्मु-
च्यतेपन्नरःसकृत्॥ १६॥ कृपयातथैतद्ब्रूहिकलावपिहिनिष्कृतिः॥ कलौकलुषचित्तानांकथमर्ःकृपरंपदं॥ १७॥
श्रीभगवानुवाच॥ शृणुलोकेहितेदेविलोकानामुद्धृतिंपरां॥ प्रायश्चित्तत्रयंवच्मिकाश्येन:संदिधस्तां॥ १८॥
वापीकूपतडागादिजीर्णोद्धारकृतांनृणां॥ प्रभवेन्नमहत्पापंकाश्यामपिकृतंहियत्॥ १९॥ आपोनाराइतिप्रो-
क्ताआपोवैनरसूनवः॥ अयनंतस्यताःपूर्वंतेननारायणःस्मृतः॥ २०॥ तेनेश्वरेणहरिणाकृतंपापप्रणाशनं॥
यत्रयत्रजलंकाश्यामुद्धरेत्सुकृतीनरः॥ २१॥ तत्रतत्रमुदायुक्ताःपितरःपर्युपासते॥ काश्यांरुद्रमयाःसर्वेजंतवःशु

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तिनोदिताः॥२२॥ तेपिबंतिजलंयत्रतडागादौतृषार्दिताः॥तत्पुण्यंनमयावक्तुंशक्यंवर्षशतैरपि॥२३॥आसी-
द्धर्मपथोनामवणिक्कश्चित्सुधार्मिकः॥कुलस्तंभस्यदायाद्येतेनखातःप्रखानितः॥२४॥तत्रगावोमनुष्याश्चपि
बंत्यंभस्तृषार्दिताः॥प्रत्यहंतस्यसुकृतंवर्धतेचन्द्रमायथा॥२५॥सूक्ष्मधर्मोमिनुष्याणांदुर्लभोविषयात्मनां॥
कालेनमहतातत्रदुर्भिक्षकरपीडितः॥२६॥दरिद्रत्वामवापोच्चैःब्रह्मर्णक्रूरभूत्ततः॥ब्राह्मणेनधृतःक्वापिस्व
धनार्थंऋणीवणिक्॥२७॥मद्धनंदेहिदुष्टेतिपरिक्षिप्तःपुनःपुनः॥ब्राह्मणेनवणिग्धर्मपथोदैन्यमुपागतः॥२८
इदानींनधनंकिंचिदस्तिब्राह्मणसत्तम॥ब्राह्मणउवाच॥मालत्रयपरीमाणंनिष्कानांहेमदेहितत॥२९॥नोचे-
त्तडागोमन्नाम्नाप्रथितव्यस्त्वयापरं॥त्वत्कारितोबहुधनैर्गंभीरोनिर्मलोदकः॥३०॥विमुक्तोभवदत्वाशुतडागं
लोकसन्निधौ॥धर्मपथउवाच॥अवश्यंमोचयतुमामृणात्क्षिप्रंभवान्प्रभो॥३१॥ऋणयुक्ताम्रियंतेचेत्पच्यंते
नरकार्णवे॥जनाश्चोरजनस्यापिगृहीत्वाधनमत्रतु॥३२॥नरकेपरिपच्यंतेऋणयुक्तानराधमाः॥किंपुनर्ब्राह्म- २
स्याणुमात्रंहत्वामृतोहियः॥३३॥ब्राह्मणायदहृदिष्यंतितत्कर्त्तास्मिनसंशयः॥सतुवार्द्धुषिकोगत्वामेलयित्वा

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

द्विजान्बहून् ॥ ३४ ॥ आनयामास देवेशिपवन्धर्मपयो वणिक् ॥ द्विजैः दृष्टो वणिग्विप्रौ कथ्यतां ज्ञानकारणं ॥ ३५ ॥
यदर्थं वयमाहूतास्तत्कुलोपदिशामहे ॥ धर्मपथउवाच ॥ अहं ऋणी ब्राह्मणस्य निष्कानां सप्तलक्षयं ॥ ३५ ॥ गृही
तं व्यवहारार्थं देवाप्नष्टं शनैः शनैः ॥ असौ विनियमेनाप्तुसुवर्णस्य वडागजं ॥ ३६ ॥ मुक्तं तं भार्यपसेवा तद्विचार्य
यथोच्यतां ॥ यथा कथं विमुक्तः स्यां तथा शीघ्रं विधीयतां ॥ ३७ ॥ ब्राह्मणाऊचुः ॥ साधूक्तं धर्मपथ ते ऋणभीस्याम् महा-
मते ॥ सुविचारितमस्माभिर्वक्तव्यं सुदृढं खलु ॥ ३८ ॥ अस्मान्नाहूय यो दृष्टोन ष्ट्रोष्यति वचो हि नः ॥ शिरस्तस्य वि
शीर्णः सन्पतिष्यति न संशयः ॥ ३९ ॥ ब्राह्मणउवाच ॥ ब्राह्मणानां वचो ग्राह्यं मया सर्वात्मना हितं ॥ अत्र प्रमाणं भगवा
न्विश्वेशः पार्वतीपतिः ॥ ४० ॥ धर्मपथउवाच ॥ यद्भूमिदेवैर्वक्तव्यं तन्मया ग्राह्यमेव हि ॥ अत्र प्रमाणं भगवा-
न्विश्वेशः पार्वतीपतिः ॥ ४१ ॥ द्विजाऊचुः ॥ आनयं तु मनुष्या ये समर्था महतीं शिलां ॥ इति श्रुत्वा सुव
लिभिर्वणिक् धर्मपथः क्षणात् ॥ ४२ ॥ आनयामास विपुलां दृष्ट्वोचुर्ब्राह्मणास्तु तां ॥ निक्षिप्यतां तडागे त्र नि
मग्नास्तु ऋणावधि ॥ ४३ ॥ यावन्मनुष्यैः पशुभिः पथिकैः स्थापितं जलं ॥ पीतं तद्धनपर्याप्तमनुन्मज्ज तु तन स्त्रियं ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

॥४४॥ दृत्युक्त्वा सा शिला विप्रैः पोलितातज्जले शुभे॥ चक्रुः शिवकथां पुण्यां काशिवासिजनैर्वृतां॥४५॥ स्नपणां
तरे गौस्तृषितासवत्सासमुपागता॥ तयापीतं जलं वत्सा सा भवच्छृणुपार्वति॥४६॥ साशिलाकृषिमुख्यानां-
प्रभावाद्गुरुतस्थ्यतः॥ जलोपर्यभवच्छीघ्रं पश्यतां सर्वदेहिनां॥ यथालघुवीफलं शुष्कं गच्छतीलीतनस्तनः॥
तथालघुतराजाता पश्यः मस्यगौरवं॥४८॥ सर्वे लोकास्तुतं दृष्ट्वाश्चर्यं तु र्के विपुंगवान्॥ अपूर्वदर्शितं पुण्यमृ
षिभिः सुमहात्मभिः॥४॥ अहोनदृष्टमस्माभिः कदाचित्सुमहाद्भुतं॥ पुण्यं सूक्ष्मं नजानंति सर्वे लोकाः
कथंचन॥५०॥ महादेवउवाच॥ काश्यां किंचिज्जलं यैस्तु संपादितमनामयं॥ नतेषां पापलेशोपि काप्यामपि
कृतं प्रिये॥५१॥ परंतु सावधानैर्हि कर्तव्यः सुजलाशयः॥ अपराधोनभवति महापापकृतस्मयः॥५२॥ देव्युवा
च॥ जलाशये कृते देवकारितेवा महात्मभिः॥ कोपराधः पतेदत्र तन्ममाचक्ष्व शंकर॥ महादेवउवाच॥ काश्यां
तिले तिले लिंगं काश्यां तीर्थं पदे पदे पदे॥ खननं काशिभूमेस्तु दुर्घटं भाविपार्वति॥५३॥ जीर्णोद्धारं चये कुर्यु
स्ते निःसंदेहा महाधियः॥ स्वयं कृतं पतत्वाना दितदनेकफलप्रदं॥५४॥ ततोप्यधिकधर्मी दिनिनकं जीर्णं तु हतं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नतत्र लिंगपीठास्मात्न तीर्थखननंभवेत् ॥ ५५ ॥ अतोजीर्णोद्धृतिः कार्यानिरव्यामहाफला ॥ जीर्णोद्धारंप्रकुर्वेतितेषांविश्वेश्वरः स्वयं ॥ ५६ ॥ काश्यांकृतानांपापानांमूलोद्धारंकरोतिहि ॥ योतुद्विरुर्वंप्रकरोतिपापंनतस्यकाश्यांमरणंप्रसिध्यति ॥ ५७ ॥ मृतोपिनिर्वाणसुखंनवाप्नुयात् यावत्पिशाचत्वमवाप्नुयान्नरः ॥ देव्युवाच ॥ पिशाचत्वस्यमर्यादांब्रूहिपापस्यचानघ ॥ यातनायाश्चयद्रूपंतुच्चबुद्धिकृतंचयत् ॥ ५८ ॥ भगवानुवाच ॥ भवानिभवभीतानांनृणांनिस्तारकारणं ॥ रहस्यमेतत्प्रवक्ष्यामि भीतानामभयप्रदं ॥ ५९ ॥ काश्यामागत्यसततंश्रोतव्याकाशिसत्कथा ॥ नविनाश्रवणंपुण्यंपापंवावेत्तिकश्चन ॥ ६० ॥ विदित्वापततेभूयोनिस्तारायपरायच ॥ सर्वलोकेषुवेदेषुविचारः श्रवणाद्भवेत् ॥ ६१ ॥ श्रुतिस्मृतिपुराणेषुसर्वशास्त्रेषुपार्वति ॥ काशीब्रह्मेतिविख्यातंतद्ब्रह्मसप्रा-प्यतेत्रहि ॥ ६२ ॥ तस्मात्काशीगुणान्सर्वैस्तत्रतत्रवदंतिहि ॥ श्रुत्वापिपापनिरतास्तान्हन्यात्कालभैरवः ॥ ॥ ६३ ॥ संवर्तनिर्दयोभूत्वायावत्पापंसमाप्यते ॥ महापातकसंयुक्तास्त्रिंशदब्दसहस्रकं ॥ ६४ ॥ प्रत्येकंप्राप्नुवंतिवयातनांकालभैरवीं ॥ क्षुद्राणिपापानितुसंग्रहेणाभवंत्यवश्यंतुमहांतितानि ॥ यथाहिरण्यकणशोपिसंचितंनि

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ष्कादिवुद्धिं भवतेभवानि ॥ ६५ ॥ सर्वोपिलोकः कुरुतेप्रवृत्तिं प्रवृत्तिभाजां खलुपातकं स्यात् ॥ अतः क्रियज्जीवितमात्र
लक्ष्यनिवृत्तिरंगीक्रियतेमुमुक्षुभिः ॥ ६६ ॥ वाक्पालकं मानसकायिकेच प्रवृत्तिमार्गेनिरतस्यावश्यं ॥ भवत्यसौय
द्यपिसावधानस्तथापिसंस्कारवशादुपैति ॥ ६७ ॥ अतः प्रवृत्तिं परिहायसेव्यावाराणसीसाधुजनैः सुखार्थिभिः
नचेद्यथेष्टाचरणेनयत्फलंतद्भोगकालेप्रकटीभविष्यति ॥ ६८ ॥ लौकिक्योयातनाः कैश्चित्सोढुंशक्यानपार्वति ॥ किं
पुनः कालराजेनकृतास्तीव्रातिदुःखिताः ॥ ६९ ॥ नित्यंकृतानांक्षुद्राणांपापानांनित्यकर्मणां ॥ नाशः संपाद्यतेसद्भि
र्गंगास्नानादिभिर्नृभिः ॥ ७० ॥ त्रिंशद्वर्षसहस्राणित्रिंशद्वर्षशतानिच ॥ पच्यतेदुःखसंघौघैः कालराजेनसादरं ॥
॥ ७१ ॥ अतः श्रुत्वातडागादिजीर्णोद्धारंप्रकल्पयेत् ॥ सेवेकृतानांपापानांप्रायश्चित्तंगतंमम ॥ ७२ ॥ असावधाना
हिनरात्मनोवैकुर्वंतिपापानिकिमत्रचित्रं ॥ एवंविजानंतिवदंतिनित्यंदासुपंडितास्तेपिविषाग्निमध्यगाः ॥ ७३ ॥
भवंतिदुःखान्यनुभूयपश्चात्तापेनपापेनचदह्यमानाः ॥ पुनः पुनर्विषयासक्तचित्ताः शास्त्रंगुरुंदेवमथोनुकाशीं ॥
॥ ७४ ॥ न्यक्कृत्यभूयोविषयेष्वेवबुद्धिंकुर्वंतिसत्यांनतुकाशिकायां ॥ व्यवहारोपितैस्त्यक्तः प्रसिद्धः सर्वजंतुषु ॥ मुक्ति

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कापरिवर्तेन हिरण्यं प्राप्यते न हि ॥ ७५ ॥ अहो काश्यां कौतुकं तु पश्य प्रार्वतिसर्वदा ॥ गृहीत्वा नरकं देहं प्रदहास्य मृतं
पुनः ॥ ७६ ॥ श्रुत्वा ध्यायन्निमं पुण्यं न दुःखैरभिभूयते ॥ सुखवासश्च भवति काश्यां सर्वजनप्रियः ॥ ७७ ॥ इति श्रीब्र-
ह्मवैवर्ते पंचक्रोशीमाहात्म्ये प्रथमोध्यायः ॥ १ ॥ श्रीदेव्युवाच ॥ देवदेव महादेव भक्तानामभयप्रद ॥ काशीवासः सुग
हनः पापिनां धनलोभिनां ॥ १ ॥ विषयासक्तमनसां न सुखाय कदाचन ॥ सुखाय सर्वलोकानां प्रवृत्तिः कथिता कलौ ॥
॥ २ ॥ विषयैः परितुष्टानां जीवनं नान्यथा भवेत् ॥ प्रायश्चित्तं तरं देवं वरस्त्वयदि मन्यसे ॥ ३ ॥ प्रायश्चित्तविहीनस्य य
तना जायते ध्रुवं ॥ बिभेमि दीनाञ्जन्तुजान् दृष्ट्वा शास्त्रपराङ्मुखान् ॥ ४ ॥ तान् पश्य दुर्वरे देवेशप्राठान् स्वेच्छापरिग्रहान्
॥ महादेव उवाच ॥ साधु पृष्टं त्वया देवि सेत्रपापकृतां नृणां ॥ निस्तारः स्याद्यथा मंस्तु प्रायश्चित्तेन येन हि ॥ प्रायश्चि
त्तविहीनानां पावना बहुदुःखदा ॥ ६ ॥ तस्मात्सर्वप्रयत्नेन प्रायश्चित्तं समाचरेत् ॥ जैगीषव्यो मुनिश्रेष्ठस्तपस्वी मत्प-
रायणः ॥ ७ ॥ तेन पृष्टोहमागस्य शिष्यार्थं तद्दयालुना ॥ स्तुत्वा मां वैदिकैः सूक्तैः स्मार्तैः पौराणिकैः शुभैः ॥ ८ ॥
प्रसन्नं मां मुनिर्ज्ञात्वा वचनं चेदमब्रवीत् ॥ जैगीषव्य उवाच ॥ किंचिद्विज्ञप्तुकामोहं देवदेव दयानिधे ॥ ९ ॥ आज्ञया

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मवद्दास्यज्ञः सर्वज्ञस्यतवाग्रतः ॥ मयावोक्तोवरस्सेतित्वंमद्भक्तः प्रियः सुचिः ॥ १० ॥ अदेयंतवनास्त्यत्रनिर्दिष्णा-
तिपाव्यतां ॥ यस्तुमांसर्वभावेनभजतेकोपिमानवः ॥ ११ ॥ नतस्यादेयमस्तीहत्रैलोक्येसचराचरे ॥ जैगीषव्युवाच ॥ अ-
यंममदुराचारः शिष्यः पापरतः सदा ॥ १२ ॥ काश्यांवसन्नपिमदाल्लस्यात्कुसंनवेत्तियत् ॥ शिक्षितोबहुधास्माभि
र्बहुधाताडितोपिच ॥ १३ ॥ परदाररपरद्रोहरतः परधनापहृत् ॥ पिशुनः पापनिरतोवेश्यागृहनिवासकृत् ॥ १४ ॥ पितृ-
मातृगुरुद्रोहीविप्रमित्रद्रुगेवच ॥ किंबहूक्तेनदेवेशपापनिर्वचनंमया ॥ १५ ॥ नशक्यतेलज्जयास्यकर्तुंयद्ब्राह्मणोह्य
सौ ॥ मयानिष्कासितः पापआश्रमात्स्वाततोगतः ॥ १६ ॥ किंचित्किंचिच्चेष्टितंहित्वात्वाप्लुत्वापिशिक्षितः ॥ नक-
रोतियदाकिंचिच्छिक्षितंनिर्दतस्त्वयं ॥ १७ ॥ तदावाग्व्यवहारोपित्यक्तः सर्वात्मनामया ॥ मत्सन्निधौविनयवा-
न्वेश्याचारोवहिः सदा ॥ १८ ॥ इतिपौरमुखाच्छ्रुत्वाचेष्टितंतस्यदुर्मतेः ॥ मत्सन्निधानाद्गच्छत्वंनोचेच्छस्यामिदु-
ष्कृत ॥ १९ ॥ मत्तः पठित्वाशास्त्राणिधर्मज्ञानंमयानिच ॥ करोषिनित्यंतत्कर्मयेनलोकः पराङ्मुखः ॥ २० ॥ बहुधा ५
सर्वलोकेभ्यः श्रुत्वादुर्विनयंतव ॥ त्यक्तोमयापृथेच्छत्वंगच्छवातिष्ठवाधुना ॥ २१ ॥ इत्युक्तः समयाशिष्योलज्जितः

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्यापकृत्तमः प्रगंतुंमतिंस्त्वांकृतवान्‌विहायान्यत्रकाशिकां॥२२॥ काशींपरित्यज्यगतोविदूरंविंध्याद्रिकूटंसमदा-
प्यचार्यं॥ तपश्चचारात्मविशुद्धिकारणंवर्षत्रयंपत्रतृणादिभुक्परं॥२३॥ त्यक्त्वाद्रिकूटंचततःप्रयातोगोदावरीं
भीमरथींवतोपि॥ तत्रापितस्त्वासुचिरंधृतव्रतोनशर्मलेभेसुकृतैकसाध्यं॥२४॥ ततःश्रीशैलमगमद्दृष्टुंस्वामि
नमव्ययं॥ स्थितमग्रेविभुंस्कंदंदृदर्शेनतवात्मजं॥२५॥ तत्रैववसतिंचक्रेतपःशुद्धंचकारच॥ काश्यांकृतानां-
पापानांशुद्धयेधर्मवृद्धये॥२६॥ एवंबहुतिथेकालेह्यगस्त्यःकुंभसंभवः॥ काशीविरहदुःखेनविह्वलःसमुपा
गतः॥२७॥ हाकाशिकाशिहाकाशिकाशिहेकाशिकेतिच॥ बहुधाव्याकुलोभूत्वापठन्स्कंदमुपागतः॥२८
वारंवारंश्रवणतःकाशीनामामृतस्यहि॥ मयाहृष्टःकाशिवासीह्यगस्त्यःस्कंदएवच॥२९॥ नानातपोभिरत्यु
ग्रैर्नमयास्कंदईसितः॥ काशीनामानलेनाशुदग्धपापोदृष्टवान्‌॥३०॥ इतिमामुक्तवान्पूर्वंपुनःपृष्टोमया-
त्वयं॥पुनरुचेतयोःशुद्धंसंवादंकाशिसंमतं॥३१॥ अथस्मिन्नागतंदृष्ट्वास्कंदःप्रीतमनाभवत्‌॥ स्कंदउवाच॥
आगच्छगच्छमांशीघ्रंपरिष्वजमहामुने॥३२॥ काशिकाविरहात्त्वांतुजानेव्याकुलमानसं॥ ज्ञानिनामपिधीरा-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पं॰ मा॰ णां योगिनांस्तुतपस्विनां ॥३३॥ काशीविरहजंदुःखंबाधतेविदुषांकिल ॥ जडानांदेहगेहादिप्रीतियुक्तमनोधियां ॥३४
६ अन्यप्रदेशवत्काशीभातिनिसंदुरात्मनां ॥ त्वंकाशीवासतन्मेहः शंकरार्चनतत्परः ॥३५॥ देवैःस्वकार्यनिरतैःकर्मरू
पैर्विवासितः ॥ काश्यांवसतियःकश्चित्काशींपश्यतियस्त्वहं ॥३६॥ काशींस्मरतियःकश्चित्सपूज्योममसर्वदा ॥
इत्युक्त्वापूजितस्तेनस्वामिनामुनिसत्तमः ॥३७॥ स्नानाचमनपानादिसर्वपप्रच्छकुंभजं ॥ स्कन्दउवाच ॥ वरस्वागस्त्य
सुहृदात्मन्कंकामंकरवामते ॥३८॥ नचास्मद्दर्शनंप्राप्यशोचितुंत्वमिहार्हसि ॥ अगस्त्यउवाच ॥ जयदेवमहादेवतन-
यानंददायक ॥३९॥ वाराणसींप्रापयस्वयदितुष्टोसिषण्मुख ॥ स्कंदउवाच ॥ त्वंप्राप्स्यसिमहाबुद्धेविप्रांतेकाशिकां
शुभां ॥ नवापिकर्मगहनंकाशींसत्वात्रतिष्ठसि ॥४०॥ नह्यापतेसूक्ष्मतरंहिकिंचित्कर्मास्तिलोकस्यसुदुर्विभाव्यं
॥ योगाद्वियज्ञादितपोभिरुग्रैर्युक्तस्यतेसंप्रतिनास्तिकाशी ॥४१॥ नह्यापतेसूक्ष्मतरंहिपुण्यंनीचोपिकाश्यांतनुभृ
त्सदास्ते ॥ देवादयोपिप्रभवंतिनैवस्थातुंक्षणंकाशिकायांकुगर्वाः ॥४२॥ विश्वेशविश्वेशशरण्यशंभोनान्यागः-
तिस्त्वसदृशंविहाय ॥ अनेकतापार्दितमानसानामस्माकमाकांक्षितदानदक्ष ॥४३॥ त्वयाकृतेपंजनतापशां

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

त्ययेमयामृतंपापमिवुंजनानां॥ नजातिशीलंसुकृतंवापिदृष्ट्वाज्ञानामृतंयच्छसिशंकरत्वतो॥४४॥पुराणशास्त्र
स्मृतिधर्मशास्त्रविद्भिर्नृभिर्यदितंधर्मसाध्यं॥आश्रममात्रंसाधनंनःकृपालोनोवाधर्मसांख्यमुक्तंतपोवा॥४५॥दीना
नहंकारविकारहीनान्मयातिकाशीपतिराहतात्मा॥दीनानाथैकशरणंक्षेत्रंक्षेत्रज्ञयिष्ठितं॥प्राप्यतेनिरहंकारै-
राशाशतविवर्जितैः॥४६॥अगस्त्यउवाच॥यमाहाद्यदिसूक्ष्मंवास्थूलंवापातकंनृभिः॥कृतंकाश्यांतारकारेकथं
तस्यास्तुनिष्कृतिः॥४७॥स्कन्दउवाच॥अविमुक्तेकृतानांतुपापानांकुंभसंभव॥नहष्टानश्रुतावापिसासाच्छिव
मुखादपि॥४८॥निष्कृतिंस्थूलसूक्ष्माणांशिवोवेत्तिनचापरः॥जैगीषव्यउवाच॥इतिश्रुत्वास्कंदमुखाज्ज्ञातवा
सःस्वयंपुनः॥४९॥सहसामामथागत्यपप्रच्छेमामासशंकर॥मयापिनश्रुतादृष्टाक्षेत्रपापकृतांनृणां॥५०॥नि-
ष्कृतिःशर्वसर्वज्ञब्रूहिचेदस्तिशंकर॥५१॥श्रीभगवानुवाच॥जैगीषव्यमुनेत्वंमेभक्तःपरमतापसः॥श्रुतिस्मृ
तिपुराणज्ञःकाशीतत्त्वविदांवरः॥५२॥तवाग्रेकथयिष्यामिकाशीमाहात्म्यमुत्तमं॥प्रायश्चित्तंमास्तिकिंचि
त्क्षेत्रपापकृतांनृणां॥५३॥अस्तिचैकंसुगोप्यंहित्वदग्रेकथयाम्यहं॥प्रायश्चित्तंनान्यदस्तिसुनेत्रानंविना॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

क्कचित्॥५४॥ ज्ञानंचदुर्लभंनृणांविषयासक्तचेतसां॥तज्ज्ञानंकाशिकायांहिसाक्षाद्भवतिदेहिनां॥५५॥देहाभि
मानिनांसौख्यंऋषिणामपिदुर्लभं॥अत्रानन्दवनेज्ञानंआच्छादयतिदुर्मतिः॥५६॥स्वल्पेनाच्छाद्यतेज्ञानंभंगु
ल्यासूर्यवत्खलु॥तस्मात्त्वमिवयोधीरस्सभवेत्ज्ञानभाजनं॥५७॥नजितेंद्रियतालोकेनवैराग्यंतपोपिन॥विवि-
क्तसेवासत्संगश्रवणाद्यपिदुर्लभं॥५८॥अन्यान्यपिमुमुक्षूणांसाधनानिमहांतिच॥भवंतिकानिचिद्देषेनचान्य
त्राहतात्मनां॥५९॥भवंतिकाश्यांसफलानितानिमोक्षावसानानिसुसाधनानि॥सदास्सदानन्दवनेममालयेमया
सहायेनसुसाधितानि॥६०॥काश्यांस्थितानांजंतूनांअविचारितकर्मणां॥नसुखंनपराशांतिस्तस्मात्काश्यांविचा
र्यकृत्॥६१॥सुखमाप्नोतिपरमंपरांशांतिंप्रयातिहि॥प्रायश्चित्तविहीनानांनशांतिःकुत्रचिद्भवेत्॥६२॥किंपुनः
काशिकामध्येपापंकृत्वासुखीभवेत्॥ब्रह्महत्यादिपापानांप्रायश्चित्तंहिकाशिका॥६३॥काशिकायांकृतेपापेप्रा
यश्चित्तंनविद्यते॥प्रायश्चित्तविहीनानांयातनास्तिसुदारुणा॥६४॥ज्ञानस्वरूपाकाशीयंपंचक्रोशपरीमिता॥तस्मा: १
न्मरक्षिणांकृत्वानरःपापैःप्रमुच्यते॥६५॥ममब्रह्ममयंलिंगंआपातालात्समुत्थितं॥सत्यलोकोपरिगतमस्यतिष्ठ

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

द्भ्रांगुलं ॥ ६६ ॥ आजन्मसंचितैः पापैर्मुच्यतेतत्प्रदक्षिणात् ॥ क्षेत्रेकृतानांपापानांप्रायश्चित्तंनचेतरत् ॥ ६७ ॥ प्र
दक्षिणद्वयंकृत्वादशजन्मकृतादघात् ॥ मुक्तोभवतिपापात्मासद्योमोक्षमवाप्नुयात् ॥ ६८ ॥ शुभकृद्यदिकुर्या-
द्दिमोहात्पापंनतस्यतत् ॥ क्षेत्रंप्रदक्षिणीकृत्यभवेत्पापोहिविज्वरः ॥ ६९ ॥ प्रदक्षिणत्रयंकृत्वापापंजन्मशतार्जि
तं ॥ विलयंचप्रयात्येतन्नात्रकार्याविचारणा ॥ ७० ॥ यावज्जीवंवसेत्काश्यांप्रत्यब्दंतुप्रदक्षिणं ॥ कुर्यादेवनिरालस्यो
ह्यानन्दसदनस्यहि ॥ ७१ ॥ प्रत्यब्दंयेप्रकुर्वंतिपंचक्रोशप्रदक्षिणं ॥ जीवन्मुक्तास्तुतेज्ञेयानिःपापाःकाशिवासिनः
॥ ७२ ॥ इतिब्रह्मवैवर्तेतृतीयभागेपंचक्रोशीमहात्म्येद्वितीयोध्यायः ॥ २ ॥ श्रीमहादेवउवाच ॥ अत्रैवोदाहरंती
ममितिहासंपुरातनं ॥ ऋषिः कूष्मांडतनयोमंडपःसंगदोषतः ॥ १ ॥ बालएवममक्षेत्रेपापंचरतिवेदवित् ॥ पित्रानि
वारितोमात्राभ्रात्राभ्योत्रियवंशजः ॥ २ ॥ असत्संगंत्यजतिनोविषयासक्तमानसः ॥ परदारपरद्रव्यपरद्रोहरतःस-
दा ॥ ३ ॥ परापवादकुशलोवेदवादविवर्जितः ॥ यथायथावयस्तस्यवृद्धिंप्रापसुदुर्मतेः ॥ ४ ॥ तथातथापापरतः
सत्संगविमुखःसदा ॥ अपवित्रैस्त्रिभिर्मित्रैःसंहतोराजवेश्मनि ॥ ५ ॥ प्रविष्टोथनमादायचौर्येणसविनिर्गतः

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वेश्यागृहे तन्निसिष्यतयासह दिवानिशं ॥६॥ रमते मंडपो विप्रः पितृविप्रत्वनाशकः ॥ कदाचिद्भ्रमप्राप्तोसौ तृषा-
र्तः समपद्यत ॥७॥ मंचाग्रस्थमंत्रपात्रस्थां गृहीत्वापीतवान्सुरां ॥ जलबुध्यापातकं तज्जातं तद्विचारतः ॥८॥ किं
मे तद्धि मयापीतमिति वेश्यां सपृष्टवान् ॥ तमाह सा मयानीतं सुरापात्रं सुसौख्यकृत् ॥ ९॥ त्वदर्थं संस्थितं मद्यं पु-
नः पिव सकृत्सकृत् ॥ इति वेश्यावचः श्रुत्वा धिग्धिक्पापं मया कृतं ॥१०॥ वेश्यासंगेन मदिरापीता ब्राह्मणसत्त-
ना ॥ मंडपस्य ततो मित्रद्वयमासीत्सुदुःखितं ॥ ११॥ वेश्यामुखात्सुरापानं तस्य श्रुत्वा जगर्हतुः ॥ आवां विप्रसु-
तोस्माकं संगी पापरतः सदा ॥१२॥ सुरापानं ततो जातं ततस्त्वं किं करिष्यसि ॥ आच्छादयावः पापं ते सुवर्णैर्दक्षिणां
वद ॥१३॥ तथेत्युक्त्वा पुनर्वैश्यागारं गत्वा प्रविश्य सः ॥ सुवर्णं याचयामास ताडयामास तं च सा ॥१४॥ वेश्योवाच ॥
वराकं मम लीलायाः स्वादं ज्ञात्वापि मूर्खवित् ॥ सुवर्णं याचसे किं त्वं लसमात्रं किं यन्मम ॥१५॥ चुंबने चुंबने लक्षं चक्रु-
म्पः प्राप्तमद्य वै ॥ त्वं मयोपेक्षितो दीनो दत्त्वा प्रार्थयसे धनं ॥१६॥ कामशास्त्रं त्वया मूढ पठितं न कदाचन ॥ यतो ली-
लां न जानासि मम कन्दर्पमोहिनीं ॥१७॥ गच्छ गच्छ सुखेनाद्य यावद्दासो न संति मे ॥ ताडयिष्यंति सर्वास्त्वां निर्ल-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

जंब्राह्मणाधमं ॥ १८ ॥ वेश्यागृहात्ततस्तूर्णं क्षुधितोपिपिपासितः ॥ पितुः सकाशमगमन्मातुश्च प्रियकाम्यया ॥ १९
दृष्ट्वतो दारकौ प्राप्तौ मित्रत्वे परिकल्पितौ ॥ वरं तौ देहि कनकं अस्मदं शं त्वमाशुवै ॥ २० ॥ राज्ञो गृहाद्यदानीतं स्तेयै
नास्माभिरुत्तमं ॥ इति श्रुत्वा पिता तस्य महादुःखसमन्वितः ॥ २१ ॥ उवाच दारकौ भीतः कौयुवां केन कर्मणा ॥ कौ
भवंतौ कथं संगः कृतोनेन दुरात्मना ॥ २२ ॥ तद्धिरण्यं हि कुत्रास्ते यदर्थं वां समवस्थितौ ॥ दारकावूचतुः ॥ अहंतु विप्र
त्वत्पुत्रो नंउपो नापितस्त्वयं ॥ २३ ॥ मैत्री त्रयाणां संजाता दैवाद्दोषत्रयात्मिका ॥ विभज्य भागाः सर्वैर्हि ग्राह्या इति
विधिः कृतः ॥ २४ ॥ अनेन वेश्याभवने निक्षिप्तं सर्वमेव हि ॥ सा न मह्यं दद्यतिमुने वेश्यावादविवादिनी ॥ २५ ॥ अतः
परं राजगृहं गंतव्यं वक्तुमेव हि ॥ देहि द्राक्यवास्माकं धनं शीघ्रं हि दुःखदं ॥ २६ ॥ नोचेत्तवात्मजः साधो ग्रहलग्नो
भविष्यति ॥ रक्षस्वत्वं तथास्मांश्च स्वात्मानमपि चानघ ॥ २७ ॥ कूष्मांड उवाच ॥ आगच्छत मया सार्द्धं राजन् राजस्य स
न्निधौ ॥ उत्तं गृहीत्वा गच्छामि यास्त्पर्यं धर्मतोपथा ॥ २८ ॥ राजभिः कृतदंडास्तु सुध्यंति मलिना नराः ॥ अनिर्वे
शाकृतः पापागच्छंति नरकं मृताः ॥ २९ ॥ दारकावूचतुः ॥ उत्तं समर्पयसुने किमर्थं त्वं गमिष्यसि ॥ राज्ञा ग्रहं विवा-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पं॰मा॰ द्वार्शनगंतव्यंकदाचन ॥ ३०॥ कूष्मांडउवाच ॥ भवत्सहनसंबंधरस्तुत्कानीपतांसुतः ॥ नोचेदहंगमिष्यामिराजवेश्म
९ सुनिश्चितं ॥ ३१॥ द्वारकावूचतुः ॥ त्वयासहनसंबंधोदेहिमित्रदुहंशठं ॥ अस्माभिरेवगंतव्यंत्वंज्येष्ठस्तिष्ठलज्जितः
॥ ३२॥ कूष्मांडउवाच ॥ पुत्रगच्छद्विजश्रेष्ठद्विजकृत्यंत्वयाकृतं ॥ प्रायश्चित्तंविधायाशुरःशादत्तंनचान्यथा ॥ ३३॥
आगंतव्यंत्वयावत्सनोचेद्याहियथासुखं ॥ तावन्नाहंतवपितानसुतस्त्वंममाघवान् ॥ ३४॥ ईश्वरउवाच ॥ जैगीष
व्यमुनिश्रेष्ठतेनविप्रेणमंडपः ॥ समर्पितस्तयोःपुत्रस्नेहमुन्मुच्यदूरतः ॥ ३५॥ धार्मिकाणांधनैःपुत्रैःकलत्रैःकिंमयो
जनं ॥ धर्मसंग्रहशीलानांपतनस्तेकाशिवासिनः ॥ ३६॥ पुत्रोभ्रातापितावापियःकाश्यांपापमाचरेत् ॥ त्याज्यएवसपा
पात्माभवेत्संसर्गजाद्भयं ॥ ३७॥ तंनीत्वातौदूरदेशंताडयामासतुःक्रमं ॥ सताड्यमानोमूर्छांतुप्रापमृत्युसमांमु-
ने ॥ ३८॥ मृतोयमितिचोत्सृज्ययपुत्तौविषण्णवत् ॥ पश्चात्तापेनसंयुक्तावसिसंगमसन्निधौ ॥ ३९॥ सत्वाविप्र-
मृतंभीतौगतौसिद्धेश्वरालयं ॥ ततोपिस्नात्वातुतौरात्रिंदुःखितौसुधितौभृशं ॥ ४०॥ पश्चात्तापपरीतौतुपुनरन्वेषि
तुंगतौ ॥ मृतोवाजीवतितुवाज्ञात्वादेशंत्यजावहे ॥ ४१॥ यावद्विचारणपरावागतावसिसंगमे ॥ तावद्द्विजसुतोभीतो

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

गतमूर्च्छः प्रतस्थिवान् ॥४२॥ षंढकोशात्मकस्यैव शिवलिंगस्य तद्दिने ॥ प्रदक्षिणं प्रकुर्वीति शिवमाहात्म्यवैरिणः ॥४३॥
सोऽत्र प्रदक्षिणं कृत्वा तत्संगेन विनिर्गतः ॥ तस्मिन् दिने कर्दमेशसन्निधौ यात्रिणः स्थिताः ॥४४॥ सोऽपि तत्र स्थितो विप्रो मं
डपो मंडपोऽभवत् ॥ रात्रौ जागरणं तेन कृतं नृत्यं शिवाग्रतः ॥४५॥ सर्वैः प्रोत्साहितः साधु साधु साध्विति साध्विति ॥ अयं
परमशैवस्य कूष्मांडस्य तु मंडपः ॥४६॥ उत्तः शिवव्रतधरः साधु नृत्यति गायति ॥ न तस्य चेष्टितं कोऽपि तन्मध्ये वेत्ति त
त्वतः ॥४७॥ अत एवाद्भुतः सद्भिर्भक्तिं दृष्ट्वा बहिर्गतां ॥ सोऽपि चारुविचित्रांगः सर्वेषां सुमनोहरः ॥४८॥ बभूव सद्भक्ति
परः सत्संगेन द्विजोत्तमः ॥ विचार्य मनसि ह्येवं शिवभक्त्या सतां प्रियः ॥४९॥ ततोऽस्मिद्दुष्टोऽपि सदा पंचपातकसंयुतः ॥
साधुवादः सतां द्वेषो भवति प्रत्यहं मम ॥५०॥ धनधान्यादिलब्धिश्च भोजनाच्छादनानि च ॥ अनायासेन लभ्यंते ऋजु
मार्गेण नित्यदा ॥५१॥ शिवे भक्तिः सतां तुष्टिर्देहपुष्टिर्निराकुला ॥ येन मार्गेण भवति स मार्गः सर्वसंमतः ॥५२॥ एवं
विचारयन् सोऽथ चंडिकां प्राप मंडपः ॥ तत्र पूजां भीमचंड्याः कृत्वा काशिनिवासिभिः ॥५३॥ ब्राह्मणैर्भोजितः सम्यगा
दृत्य शिवभक्तिकृत् ॥ उपविष्टास्ततो रात्रौ देव्याः पुरत आदरात् ॥५४॥ सेत्र माहात्म्यकथनं श्रवणं चक्रुरुत्सुकाः

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पं॰मा॰ ततोविष्णुजनाःशैवाःकीर्तनंचक्रुराहताः ॥ ५५॥ तन्मध्येमंडपःशैवोंद्रोनृत्यंगानंचकारह॥ साधुवादेनमहताउनस्तैः
१० साधुसत्कृतः ॥ ५६॥ तस्यापिहिमनोब्रह्मन्द्विवेमपिसमाहितं॥ अथतृतीयेदिवसेमार्गएवसमंडपः ॥ ५७॥ नृत्य
न्गच्छतिगायन्सस्वप्रमेवशिवस्वयं॥ पदेपदेदक्षिणतः क्षेत्रस्यममसद्विजः ॥ ५८॥ ब्रह्महत्यादिपापानांप्रायश्चित्तं
भवेद्यथा॥ महादेवमहादेववासुदेवशिवेतिच ॥ ५९॥ स्मरन्नृत्यत्यभीक्ष्णंसस्वैरपिवहिःकृतः ॥ तृतीयेदिवसे
गत्वावंदेदहुंढिविनायकं ॥ ६०॥ स्नानयामासुरव्यग्राकाशीभक्तिमिरद्दयो ॥ मंडपोलौल्यरहितः शिवनामपरायणः
॥ ६१॥ बलादन्नमपिसत्काहरिकीर्तनतत्परः ॥ नाश्नातिनपिबत्यंभोनकस्यापिवशोस्थितः ॥ ६२॥ निर्द्वंद्वःसम
दृक्शांतोबभूवागतसाध्वसः ॥ ब्राह्मणेनमयास्तैन्यंसुवर्णस्यकृतंरहः ॥ ६३॥ वंचितश्चपितामान्योमातासाध्वी
चवंचिता॥ पापेनोपार्जितंवित्तंवेश्यावेश्मनिविष्ठति॥ ६४॥ मनसाविप्रहननंगमनंभर्तुरेवच ॥ संपन्नंचसुरापानं
साक्षाद्वेश्यागृहेणकिं ॥ ६५॥ आहारोमैथुनंनिद्रामिथ्यावादादयोपिहि ॥ जातामगवराकस्यकथंपापपरिक्षयः
॥ ६६॥ अनुतापैःसुसंतप्तोमंडपोमंडवर्जितः ॥ क्षेत्रप्रदक्षिणंकुर्वन्निःपापःसमपद्यत ॥ ६७॥ क्वचद्वदतिसंस्मृत्य

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

संस्मृत्य स्नायसंचयं ॥ क्वचिद्वसति क्षेत्रस्य प्रदक्षिणकृद्विसहं ॥ ६८॥ काशीकाशीतिकाशीति शिव शंकर केशव ॥
पाहि मां पतितं दीनं गुरुदेवापराधिनं ॥ ६९॥ रामेश्वरं समागम्य स्नात्वा संतर्प्य देवताः ॥ रामेश्वरं समभ्यर्च्य सोमनाथं
तथार्च्य ह ॥७०॥ रामं राजीवपत्राक्षं सीतालक्ष्मणसंयुतं ॥ नभुंक्ते न पिबेत् संभोन्नृत्यगीतादितत्परः ॥७१॥ प्रार्थ्यमानो
पि गृण्हाति न किंचिदपि खेदकृत् ॥ ततः प्रचलिता सर्वे पात्रिणः शिवतत्पराः ॥७२॥ मंडपेपि स्मरन् काशीं शिवं वि
प्रतस्थिवान् ॥ वृषभध्वजमागत्य स्नात्वा वैकापिले ह्रदे ॥७३॥ देवसंपूज्य विधिवत् स्थित्वा तत्र च पूर्ववत् ॥ ततः प्रभाते
वरुणासंगमे स्नानमप्यच ॥७४॥ गताः सर्वे विश्वनाथं द्रष्टुं श्रीपार्वतीपतिं ॥ तत्र स्थित्वा महापूजां कृत्वा सर्वे सहागताः
॥७५॥ अन्नानि वासोरत्नानि ददुः शंकरतुष्टये ॥ मंडपेपि तथा कृत्वा मोक्षमंडपमध्यतः ॥७६॥ सा क्षांगं प्रणतः
प्राह तत्सदो मध्यगोऽग्यकृत् ॥ मया पापानि सर्वाणि सुमहांति बहूनि च ॥७७॥ कृतानि तत्र वदत निष्कृतिं मम सत्तमाः
यथाहं पापनिर्मुक्तो भवामीह तदुच्यतां ॥७८॥ सदस्या ऊचुः ॥ त्वं निःपापासि भक्तोसि शिवयोः केशवस्य च ॥ पंच
क्रोशात्मकं लिंगं सत्संगाद्दक्षिणीकृतं ॥७९॥ मैत्री वाणिज्यमूल्याद्यैः किंपुनः श्रवणादिभिः ॥ येन केनापि

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पं. मा. महत्पापं तस्य न विद्यते ॥ मंडप उवाच ॥ पित्रा निष्कासितः सोऽहं कथं यास्यामि तद्गृहं ॥ प्रतीतिकरणं किं द स्त्विचे
२१ द्गमनेन मम ॥ ८२ ॥ शेषयंतु नरा सभ्याः शास्त्रप्रत्ययसंयुताः ॥ गर्हयंति गृहस्थानो नो चेत्किं गमनेन मे ॥ ८२ ॥ सदस्या
ऊचुः ॥ आकारयस्व पितरं अस्मद्वचनगौरवात् ॥ प्रतीतिं दर्शयामो यद्दंडनाथस्य सन्निधौ ॥ ८३ ॥ महादेव उवाच ॥
मंडपो यगृहद्वारं गत्वा शिव शिवेति च ॥ महादेव महादेवेत्युक्त्वा तूष्णीं व्यवस्थितः ॥ ८४ ॥ कूष्मांडः प्राह द पितां को
तिथिर्द्वारि वर्तते ॥ पश्यपश्या शुसुभगे शिववाक् शंकरप्रियः ॥ ८५ ॥ सा भर्तुर्वचनाद्गत्वा दृष्ट्वा मंडपमात्मजं ॥ उवाच
वचनं भीता भर्तुः पुत्रार्थमातुरा ॥ ८६ ॥ अकृत्वैव च निर्वेशं कथमागमनं वद ॥ मंडप उवाच ॥ आहूयंति सदास्या-
स्त्वां पितरं च ममानघ ॥ ८७ ॥ निर्वेशवार्तां वृद्धलोकतएव बृवुरग्रतः ॥ जननी मंडपस्याथ गत्वा कूष्मांडमब्रवीत् ॥ ८८
पुत्रस्ते कृतनिर्वेशः शिवस्मरणतत्परः ॥ द्वारि तिष्ठति सद्वेषो नातिथिः कश्चनेतरः ॥ ८९ ॥ कृतनिर्वेश मन्यं श्रु
त्वा पुत्रं तु स द्विजः ॥ उत्थायागत्य सहसा ददर्श शिवरूपिणं ॥ ९० ॥ रुद्राक्षमालिनं शांतं विभूतिकृतभूषणं ॥ उवाच
किं समायातः शीघ्रं पुत्रं तथायवान् ॥ ९१ ॥ न हि हिंस्त्वल्पेन पुण्येन प्रायश्चित्तं महद्भवेत् ॥ मंडप उवाच ॥ मा याव हूनिपा-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पालिकृतानि विविधानि च ॥ ९२ ॥ न ज्ञायंते त्वया पित्रा किं मन्ये दूरसंस्थिते ॥ वत्सात्वामाद्धपंत्सेव सरस्याः शुद्धिद
र्शिनः ॥ ९३ ॥ पप्रोच ते कुरुत यात्वं मत्स्नेहेन माव्रज ॥ इति श्रुत्वा मंडपस्य वचः पत्न्या समन्वितः ॥ ९४ ॥ मुक्तिमंडपि
कां प्राप सरस्यैः संस्थितां शुभां ॥ सैसाहूतो द्विजवरैर्धर्माधर्मार्थदर्शकैः ॥ ९५ ॥ उपाविष्टं तमूचुस्ते कुत्र स्ते शुद्धिमाग
तः ॥ कृष्मांड उवाच ॥ प्रायश्चित्तेन केनासौ शुद्धिं प्राप्तो मम्मात्मजः ॥ ९६ ॥ प्रतीतिर्मम वाक्यास्यादयदनेन तु भुज्यते ॥
सरस्या ऊचुः ॥ मुक्तिमंडपिकायास्तु स्वामी विष्णुर्नचापरः ॥ ९७ ॥ स चेद्वदति वेदात्मा तदाशंका न चोत्तरं ॥ तस्यार्षदः
मात्तु मुख्या वदिष्यंति च सत्तम ॥ ९८ ॥ तदामन्यस्व सुप्रीतः शास्त्रदेवप्रसादतः ॥ इत्युक्त्वा च सरस्यास्ते तुष्टुवुर्वि
ष्णुमव्ययं ॥ ९९ ॥ रविं ढुंढिं दंडपाणिं भैरवं चैव पंचमं ॥ पंचापि तत्र सुप्रीताः मुक्तिमंडपमभ्यतः ॥ १०० ॥ प्राडु
र्भूता महात्मानो लोकप्रत्ययकारकाः ॥ विष्णुरुवाच ॥ अयं शुद्धो महापापो मंडपः साधुसंगतः ॥ १ ॥ काश्याः प्र
दक्षिणं कृत्वा ह्यर्चयित्वा जगद्गुरुं ॥ माहात्म्यश्रवणं जातं सेव स्याच्छुभनाशनं ॥ २ ॥ तस्मादयं गच्छतु स्वं गृहं पि
तृसमन्वितः ॥ ढुंढिरुवाच ॥ काशीति नाम जपतां शिवनाम तुल्यं विप्रादिपापनिचयो विलयं प्रयाति ॥ किंवत्स

पं॰ मा॰ २२

याश्रवनकीर्तनवासदानैः सम्यक्प्रदक्षिणवता मम्पुभस्यनाशः ॥ ३॥ दंडपाणिरुवाच॥ काश्यांपापंयेप्रकुर्वंति-
पापास्तेषांदुःखजायतेवश्यमेव ॥ शंभोर्लिंगसन्निदाकाशस्थंपंचक्रोशंतत्परिक्रम्यशुद्धः ॥४॥ भैरवउवाच ॥ का
र्येममैतत्खलुपापिनांसदाकरोमिदंडंवकुधावश्यमेव॥ प्रदक्षिणीकृत्यसमागतास्त्वपंकाशीविशुद्धोनविचारम-
स्तितत् ॥ ५॥ रविरुवाच ॥ सत्संगतः क्षेत्रसुदक्षिणीकृतंकाशीकथाश्रवणकीर्तनादयं ॥ शुभप्रदंपापहरंसुवासदं
कृतंचशुद्धोमंडपःसत्यमेव ॥ ६॥ महादेवउवाच ॥ सभासदेर्दैववरैरुक्तोकुंभांडमंडपो ॥ प्रदक्षिणीकृत्यतुलान्नम
स्कृत्यपुनःपुनः ॥७॥ निःपापोहर्षसंपूर्णोययतुस्तौस्वमालयं ॥ प्रदक्षिणफलंब्रह्मन्पंचक्रोशात्मकस्यहि ॥ ८ ॥
लिंगस्ययन्मयाप्रोक्तंसुगोप्यंपुरुषार्थदं ॥ श्रुत्वामाहात्म्यमतुलंपंचक्रोशात्मकस्यच ॥ ९॥ लिंगस्यदक्षिणाकार्या
त्वयाशिष्येणचानघ ॥ इतिश्रुत्वाप्रसन्नात्माजैगीषव्योमहामुनिः ॥ १०॥ देवंप्रदक्षिणीकृत्यनमस्कृत्यपुनःपुनः॥
जगामपंचक्रोशस्ययात्रार्थंशिष्यसंयुतः ॥ ११॥ पंचभिर्दिवसैःकृत्वायात्रामत्रागतोमुनिः ॥ उपविष्टोनिधिःसम्यक्
यात्रायाःपापनाशनः ॥ १२॥ अथाशुपयहृदेवापिनिर्विघ्नफलदायकः ॥ मुनिरागस्त्वविघ्नेशंभवान्यासहितंतदा ॥१३॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

13

॥१३॥ पूजयामासविधिवदुपचारैः सुविस्तरैः॥ शिष्योगुरुप्रसादेननिःपापोपुण्यवान्सुधीः॥१४॥जातःस्कंदप्र
सादेनश्रुत्वामाहात्म्यमुत्तमं॥ महादेवउवाच॥एतत्तेकथितंदेवकाश्यांयस्मातकंकृतं॥तस्यप्रणाशनंश्रुद्धंप्राय-
श्चित्तंसुदुर्लभं॥१५॥श्रुत्वाध्यायमिमंपुण्यंसर्वपापप्रणाशनं॥ नरःशुद्धिमवाप्नोतिकाशीवासंचगर्महृन्॥१६
इतिश्रीब्रह्मवैवर्तेतृतीयविभागेपंचक्रोशीमाहात्म्येतृतीयोध्यायः॥ ऋषयऊचुः॥सूतसूतमहाबुद्धेवदविद्यावि
शारद॥ यथाप्रदक्षिणाकार्यामनुजैर्विधिपूर्वकं॥१॥स्थानंवासस्यवदनोभक्ष्यंचाभक्ष्यमेवच॥ पूजांसीम्निस्थि
तानांचदेवानांदानमेवच॥यथासंपूर्णतामेतियात्रासेत्रस्यसत्तम॥ सूतउवाच॥ एवमेवपुराष्टष्टोभगवान्शिव
याशिवः॥३॥ तत्रमीमिमुनिश्रेष्ठाःश्रृण्वंतुविधिवन्मम॥ श्रीदेव्युवाच॥ भगवन्देवदेवेशप्रदक्षिणविधिं
वद॥४॥पंचक्रोशस्ययेनासौनिष्पापःपुण्यवान्भवेत्॥ श्रीमहादेवउवाच॥ आश्विनादिषुमासेषुत्रिषुपार्व
तिसत्तमे॥५॥प्रदक्षिणाप्रकर्तव्यासेत्रस्यापापकांक्षिभिः॥माघादिचतुरोमासाःप्रोक्तायात्राविधौनृणां॥६
पूर्वस्मिन्दिवसेढुंढिंपूजयित्वाहविष्यभुक्॥प्रातरुत्तरवाहिन्यांस्नात्वाविश्वेशमर्चयेत्॥७॥पुनर्वीनार्थयेपि

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

प॰मा॰ चशिवयोः पूजनंभवेत्॥मुक्तिमंडपिकायांचसंविष्टपवरस्वर्पिणि॥८॥प्रतिज्ञांमहतींकृत्वापूजनंतत्रतत्रह॥कोश५॥
१३ अज्ञातवाक्कायमनोजनितमुक्तये॥९॥ज्ञाताज्ञातविमुक्त्यर्थंपातकेभ्योहितायच॥पंचक्रोशात्मकंलिंगंज्योतिर्रू
पंसनातनं॥१०॥भवानीशंकराभ्यांचलक्ष्मीश्रीशाविराजितं॥ढुंढिराजादिगणपैःषट्पंचाशद्भिरावृतं॥११॥
द्वादशादित्यसहितंनृसिंहैःकेशवैर्युतं॥कृष्णरामत्रयप्रुतंकूर्ममत्स्यादिभिस्तथा॥१२॥अवतारैरनेकैश्चयुतं
विष्णोःशिवस्यच॥गौर्यादिशक्तिभिर्जुष्टंक्षेत्रंकुर्यात्प्रदक्षिणं॥१३॥बद्धांजलिःप्रार्थयीतमहादेवंमहेश्वरं
पंचक्रोशस्ययात्रांवैकरिष्येविधिपूर्वकं॥१४॥प्रीत्यर्थंतवदेवेशसर्वाघौघप्रशांतये॥इतिसंकल्प्यमौनेनप्र-
णिपत्यपुनःपुनः॥१५॥ढुंढिराजगणेशानमहाविघ्नौघनाशन॥पंचक्रोशस्ययात्रार्थंदेह्याज्ञांकृपयाविभो॥
॥१६॥विश्वेशांघ्रिःपरिक्रम्यदंडवत्प्रणिपत्यच॥मोदंप्रमोदंसुमुखंदुर्मुखंगणनायकं॥१७॥प्रणम्यपूजयित्वा
तोदंडपाणिंततोर्चयेत्॥कालराजंचपुरतोविश्वेशस्यजगद्गुरोः॥१८॥पूजयित्वाततोगच्छेन्मणिकर्णींविधानतः
तत्रस्नात्वामहादेवंमणिकर्णीशमर्चयेत्॥१९॥विनायकंसिद्धिसंज्ञंपुनरागत्यपूजयेत्॥मणिकर्णीतटेच्छन्नं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

गंगाकेशवमश्नुत॥२०॥ ललिताच्चततः पूज्यजरासंधेश्वरंविभुं॥ सोमनाथंततः पूज्यदालभ्येश्वरमेवच॥ २१॥
शूलटंकेश्वरंलिंगंवराहं पूज्यचव्रेत॥ दशाश्वमेधलिंगंचवंदीतत्रैवपूजयेत् ॥२२॥ सर्वेश्वरंचकेदारंततोहनुमदी
श्वरं॥ संगमेशंततः पूज्यलोलार्कं पूजयेत्ततः॥ २३॥ अर्कसंज्ञंगणाध्यक्षं असेस्तीरेउनर्व्रजेत् ॥ क्षेत्रमध्येनिशां
कुर्वन् तिलमात्रंनसंत्यजेत् ॥२४॥ दुर्गाकुंडेनरः स्नात्वायजेद्दुर्गविनायकं ॥ दुर्गांसंपूज्यविधिवत्वसेत्तत्रसुख
प्सये॥२५॥ ब्राह्मणान्भोजयेत्तत्रमधुपायसलड्डुकैः ॥रात्रौजागरणंतत्रपुराणश्रवणादिकं॥ २६॥ कुर्याच्चकी
र्तनंभक्त्यापरोपकरणादिव॥ जयदुर्गेमहादुर्गेजयकाशीनिवासिनि॥ २७॥ क्षेत्रविघ्नहरेदेविपुनर्दर्शनम-
श्नुते॥ इतिदुर्गांप्रार्थयित्वाविष्वक्सेनेश्वरंततः॥ २८॥ पूजयित्वाकर्दमेशंपंचत्रीहितिलैर्नमेत्॥ आदौक
र्दमतीर्थेतुस्नानंकूपावलोकनं॥ २९॥ सोमनाथंविरूपाक्षंनीलकंठंततोर्चयेत्॥ तत्रवासंविधायाग्नौकिंचिद्धो
मंद्विजार्चनं॥ ३०॥ श्राद्धादिविधिकृत्यानिकृत्वामुच्येत्ऋणत्रयात् ॥ कर्दमेशमहादेवकाशीवासजनप्रिय॥
३१॥ त्वत्प्रसादान्महादेवपुनर्दर्शनमश्नुते॥ प्रातःस्नात्वापूजयित्वासमभ्यर्च्यचद्विजानपि॥ ३२॥ नागनाथंच

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पं॰ मा॰ चामुंडां मोक्षेशं करुणेश्वरं ॥ वीरभद्रं ततो दुर्गां विकटास्यां प्रपूजयेत् ॥ ३४॥ उन्मत्तभैरवं नीलं कालकूटं ततोर्चयेत् ॥
१४ दुर्गां च विमलां नत्वा महादेवं ततो व्रजेत् ॥ नंदिकेशं भृंगिरीटिं लंबैव च गणप्रियं ॥ विरूपाक्षं च यक्षेशं विमलेश्वरमेव-
च ॥ ३५॥ मोक्षदं ज्ञानदं चैवामृतेशं तत्र पूजयेत् ॥ गंधर्वसागरं तीर्त्वा भीमचंडीं ततो व्रजेत् ॥ ३६॥ तत्र स्नात्वा भी-
मचंडीं पयसा स्नापयेत्सुधीः ॥ पंचोपचारैः संपूज्य काद्यपानपरितोषयेत् ॥ ३७॥ तत्र वासं प्रयत्नेन कुर्याच्चंडविना-
यकं ॥ रविरक्षासगंधर्वेनरकार्णवतारकं ॥ ३८॥ शिवं प्रपूज्य यत्नेन रात्रौ पूर्ववदाचरेत् ॥ प्रातरुत्थाय सुस्नातः प्रा-
र्थयेद्भीमचंडिकां ॥ ३९॥ भीमचंडी प्रचंडानि मम विघ्नानि नाशय ॥ नमस्तेस्तु गमिष्यामि पुनर्दर्शनमस्तु ते ॥ ४०॥ त-
तो गच्छेदेकपादं गणं नत्वा यतंदुलान् ॥ तिलांश्च विकिरेन्नत्र धनधान्यादिसंपदं ॥ ४१॥ ततो गच्छेन्महाभीमं भैर-
वीं भैरवीं शुभां ॥ भूतनाथं च सोमेशं प्रपूज्य सिंधुरोधसि ॥ ४२॥ कालनाथं कपर्दीशं कामेशं च गणेश्वरं ॥ वीरभ-
द्रं चारुमुखं गणनाथं प्रपूजयेत् ॥ ४३॥ ततो गच्छेद्देहलीशं विघ्नपूगनिवारणं ॥ मोदकैः शष्कुलैर्लाजैः सक्तुभि- १४
श्चेक्षुपर्वभिः ॥ ४४॥ पूजयेच्छ्रद्धयादेवं तं देहलिविनायकं ॥ तस्याग्रे षोडशाश्चापुनर्विघ्ननाथान्समर्चयेत् ॥ ४५॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

उद्दंडगणपं पूज्य उत्कलेश्वरमेव च ॥ रुद्राण्यास्तु ततो भूमिं दृष्ट्वा रामेश्वरं व्रजेत् ॥ ४६ ॥ वरणा यां ततः स्नात्वा तर्पणादि
विधानतः ॥ रामेश्वरस्ततैस्तिलैर्बिल्वपत्रादिभिर्यजेत् ॥ ४७ ॥ सोमनाथं तु तत्रैव पूजयेदिंद्रदिग्गतं ॥ भरतेशं लक्ष्म-
णेशं शत्रुघ्नेश्वरमेव च ॥ ४८ ॥ द्यावाभूमीश्वरं तत्र पूजयेन्नहुषेश्वरं ॥ तत्र वासं प्रकल्प्याथ पूर्ववज्जागरादिकं ॥ ४९
कृत्वा स्नात्वाथ रामेशं पूजयेत्काशिवासरं ॥ श्रीरामेश्वर रामेण पूजितस्त्वं सनातन ॥ ५० ॥ आज्ञां देहि महादे-
व पुनर्दर्शनमस्तु ते ॥ लिंगानि सुबहून्यासंश्चैवरणापारगान्यथ ॥ ५१ ॥ पूजयित्वा ततो गच्छेद्देवसंघनिषेवितं ॥ देव
संघेश्वरं किंचिद्दत्वा स्थित्वा ततो व्रजेत् ॥ ५२ ॥ पाशपाणिं गणेशं च क्षेत्रमध्ये व्यवस्थितं ॥ पूजयित्वा बहिश्चैव पृ-
थ्वीश्वरमथो व्रजेत् ॥ ५३ ॥ एको श्वमेधः पृथुना कृतः क्षेत्राद्बहिः पुरा ॥ स्वर्गभूमिस्तु सा ज्ञेया मोक्षभूमिस्तु म-
ध्यतः ॥ ५४ ॥ काश्याश्चतुर्दिशं देवि योजनं स्वर्गभूमिका ॥ मृतास्तत्र हि गच्छंति स्वर्गं सुकृतिनां परं ॥ ५५ ॥ तत
स्तु यूपं हि सरः पृष्ट्वा गच्छेच्छनैः शनैः ॥ महाक्षेत्रं कापिलं तु यत्र श्रीवृषभध्वजः ॥ ५६ ॥ तत्र स्नात्वा विधानेन तर्पयि
त्वा पितॄनथ ॥ श्राद्धं विधाय पश्चाद्धि पूजयेद्वृषभध्वजं ॥ ५७ ॥ निवसेत्तत्र दिवसं पुराणादि प्रकल्पयेत् ॥ प्रदक्षि

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

णीकृत्य ततो गच्छेज्ज्वालानृसिंहकं ॥ ५८ ॥ एवं प्रदक्षिणीकृत्य सरः कापिलमुत्तमं ॥ वरुणां च ततस्तीर्त्वा स्नात्वा वै-
संगमे शुभे ॥ ५९ ॥ आदिकेशवमभ्यर्च्य संगमेश्वरमेव च ॥ विनायकं खर्वसंज्ञं पूजयित्वा ततो व्रजेत् ॥ ६० ॥ कौडीकृ-
त्यपवान् क्षुद्रान् विकिरन् विष्णुमुच्चरन् ॥ प्रह्लादेश्वरमभ्यर्च्य त्रिलोचनमतः परं ॥ ६१ ॥ विन्दुमाधवमभ्यर्च्य ह्रदे
पांचनदे शुभे ॥ गभस्तीशं मंगलां च गौरीं दृष्ट्वा ततो व्रजेत् ॥ ६२ ॥ वसिष्ठवामदेवौ च पर्वतेश्वरमेव च ॥ महेश्वरं स-
मभ्यर्च्य ततः सिद्धिविनायकं ॥ ६३ ॥ सप्तावरणगान् दिव्यान् पूजयेद्गणनायकान् ॥ मणिकर्ण्यां ततः स्नात्वा गच्छेद्वि-
श्वेश्वरं प्रभो ॥ ६४ ॥ नमस्कृत्य महेशानं प्रविशेद्देवसन्निधौ ॥ पंचोपचारैः संपूज्य स्तुत्वा नत्वा पुनः पुनः ॥ ६५ ॥ मु-
क्तिमंडपमागत्य कृतार्थः स्तत्र संविशेत् ॥ विष्णुं च दंडपाणिं च ढुंढिं भैरवमेव च ॥ ६६ ॥ आदित्यं पंचगणपान् पूजये-
त्तन्नरैव च ॥ प्रदक्षिणीकृतान् देवान्स्मरेत्तत्क्रमात्सुधीः ॥ ६७ ॥ जय विश्वेश विश्वात्मन् काशीनाथ जगद्गुरो ॥
त्वत्प्रसादान्महादेव कृता क्षेत्रप्रदक्षिणा ॥ ६८ ॥ अनेकजन्मपापानि कृतानि मम शंकर ॥ गतानि पंचक्रोशात्म-
लिंगसम्यक् प्रदक्षिणात् ॥ ६९ ॥ लब्ध्वान्तिः काशिवासश्च रहिता पापकर्मणा ॥ सत्संगश्रवणाद्यैश्च कालोग- १५

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्वंतुनःसदा॥७०॥हरशंभोमहादेवसर्वज्ञसुखदायक॥प्रायश्चित्तंसुनिर्दिष्टंपापानांतस्यसादरतः॥७१॥पुनःपापम-
तिर्मास्तुधर्मबुद्धिःसदास्तुमे॥इतिजप्त्वायथाशक्त्यादत्वादानंद्विजन्मनां॥७२॥बध्वाकरस्तुगंपात्रीमंत्रमेतमुदीरयेत्॥
पंचक्रोशस्यपात्रेयंयथावद्यामयाकृता॥७३॥न्यूनंसंपूर्णतांयातुत्वत्प्रसादादुमापते॥इतिप्रार्थ्यमहादेवंगच्छेद्गृ-
हंस्वकंस्वकं॥७४॥न्यूनातिरिक्तदोषाणांपरिहारायदक्षिणां॥संकल्प्यागत्यचगृहंब्राह्मणान्भोजयेत्ततः॥७५॥
ततआगत्यचगृहेकुटुम्बैःसहभोजनं॥कृत्वात्मानंततोध्यात्वाकृतकृत्योभवेत्ततः॥७६॥एकरात्रंतुमध्येयःप्रवसे-
त्तुविमानसः॥वरुणायास्तटेरम्येसयातिपरमांगतिं॥७७॥द्विरात्रिंवसतिंमध्येयःकुर्याद्धर्मतत्परः॥प्रथमंचंडिकाक्षे-
त्रेद्वितीयंवरुणातटे॥७८॥दिवसंतुवसेद्धीमान्ततोविश्वेश्वरंव्रजेत्॥यस्तुत्रिरात्रमुषितोमध्येभवतिपावति॥७९॥
16 दुर्गास्थलेभीमचंड्यांरामेश्वरेवासमृच्छति॥वसतिंयस्तुकुरुतेमध्येदिनचतुष्टयं॥८०॥प्रथमांवसतिंकुर्यात्कर्दमे-
श्वरसन्निधौ॥द्वितीयांभीमचंड्यांतुरामेशंतुतृतीयकं॥८१॥चतुर्थींकापिलेक्षेत्रेवसतिंप्रतिकल्पयेत्॥राजवृद्ध-
कुमाराणांयथेष्टंवासमिष्यते॥८२॥यथाकथंचिद्देवेशिपंचक्रोशप्रदक्षिणं॥कुर्याद्देवनमासादिचिंतयेद्धर्मको

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

विदः ॥ ८३॥ सएवपुण्यदः कालोयत्रश्रद्धोदयोभवेत् ॥ श्रद्धाहिदुर्लभालोकेकलौखलुविशेषतः ॥ ८४॥ श्रद्धैव-
तीर्थदेवाश्चश्रद्धास्वर्गापवर्गकौ ॥ श्रद्धयायत्कृतंसर्वमनंतफलदंभवेत् ॥ ८५॥ सत्येश्रद्धागुणवतीनासदेवा
फलप्रदा ॥ काश्यांवसतियोनित्यंस्नातिभागीरथी ॥ ८६॥ कुर्यात्सांवत्सरींयात्रांपंचक्रोशस्यसुन्दरि ॥ सब्रह्मभू-
तोनिवसन्ममानुग्रहतःसुखी ॥ ८७॥ इतिश्रीब्रह्मवैवर्तेपंचक्रोशीमाहात्म्येचतुर्थोध्यायः ॥ ४॥ देव्युवाच ॥ क्षेत्र
प्रदक्षिणेदेवनियमाःकेभवंतितान् ॥ वदस्वतारिताशेषविश्वनाथकृपालय ॥ १॥ महादेवउवाच ॥ प्रतिग्रहंपरान्नं
चपरदाराभिभाषणं ॥ परस्वग्रहणंस्नेहादसद्वार्तांचवर्जयेत् ॥ असतांपापिनांसंगंनकुर्यात्प्रयतोनरः ॥ असत्संगा-
न्मात्सर्वंनिष्फलंजायतेनृणां ॥ ममद्रोहपरैःसाकंनव्रजेद्विष्णुनिंदकैः ॥ परापवादंनोकुर्यात्परद्रोहंचवर्जयेत् ॥
॥ ४॥ गुरुनिंदांशास्त्रनिंदांशिवधर्ममहात्मनां ॥ ।तीर्थलिंगंतयोर्निंदांनकुर्यात्तुप्रदक्षिणी ॥ ५॥ अन्यदातुकृतं
पापंनश्येत्क्षेत्रप्रदक्षिणात् ॥ पापंप्रदक्षिणामध्येकृतंकेनप्रणाश्यते ॥ ६॥ ब्राह्मणैःक्षत्रियैर्वैश्यैःशुद्रैश्चै १६
वांत्यजातिभिः ॥ कांक्षिभिःपरमंतत्वंकर्त्तव्यंक्षेत्रदक्षिणं ॥ ७॥ किंचिद्दानंप्रसहंब्राह्मणेभ्योदेयंदीनानाथपं-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

17

स्वंधकेषु ॥ भूमौ शय्या तैलमांसादिदुष्टं सर्वं वर्ज्यं तीर्थयात्रादिनेषु ॥ ८ ॥ स्नानद्वयं प्रकुर्वीत नित्यं श्राद्धं च सुन्दरि ॥ यदत्र
किंचित्क्रियते कोटिकोटिगुणं भवेत् ॥ ब्रह्मचारी गृहस्थो वा वानप्रस्थोथ मस्करी ॥ क्षेत्रे वसन्वहिर्वापि कुर्याद्देव प्रद-
क्षिणं ॥ १० ॥ ब्रह्महत्यादिपापानां प्रायश्चित्तं न चापरं ॥ वहिः कृतानां पापानां मध्ये वापि सुरेश्वरि ॥ ११ ॥ प्रायश्चित्तां-
तरं तु सो न दृष्टं मया ध्रुवं ॥ वसंति देवा वहवः स्वर्गभूमौ वहिः सदा ॥ १२ ॥ मदाज्ञां पालयं क्षेत्रवासार्थं दैन्यमागताः
॥ वहिः स्थिताः प्रकुर्वंति दक्षिणं क्षेत्रलब्धये ॥ १३ ॥ ममानुग्रहमासाद्य प्रविशंति हि काशिकां ॥ मदनुग्रहकामैश्च
पंचक्रोशात्मकं प्रिये ॥ १४ ॥ लिंगं प्रदक्षिणीकृत्य दृष्टव्योहं कृपानिधिः ॥ अस्मिन्क्षेत्रे महादेवि पुण्यं पुण्यतरं तु वा
॥ १५ ॥ अनंतकोटिगुणितं भवत्येव न संशयः ॥ अंतर्गृहे कृतं पापं केवलं यातनावहं ॥ १६ ॥ अन्यक्षेत्रे कृतं पापं पु-
ण्यक्षेत्रे विनश्यति ॥ पुण्यक्षेत्रे कृतं पापं गंगातीरे विनश्यति ॥ १७ ॥ गंगातीरे कृतं पापं वाराणस्यां विनश्यति ॥ वा-
राणस्यां कृतं पापमंतर्गृहे विनश्यति ॥ १८ ॥ अंतर्गृहे कृतं पापं वज्रलेपो भविष्यति ॥ वज्रलेपच्छिदं ह्येतत्पंचक्रो-
शप्रदक्षिणं ॥ १९ ॥ तस्मात्सर्वप्रयत्नेन कुर्यात्क्षेत्रप्रदक्षिणं ॥ वाराणसीं तु संप्राप्य प्रमादाद्यो वहिर्गतः ॥ २० ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पं. मा देवात्सपुनरागत्यदक्षिणेनप्रसुप्यति ॥ अविमुक्तंमहाक्षेत्रंसर्वदाजननीयथा ॥ २१ ॥ उत्रस्यजननीलोकेसर्वथाहित
२७ कारिणी ॥ हितकृत्सर्वजंतूनांकाशीहामुत्रसर्वदा ॥ २२ ॥ देव्युवाच ॥ भगवन्सर्वभूतेशात्कृपाधृतविग्रह ॥ कृतार्थ
नांवदविभोक्षेत्रसन्यासिनामपि ॥ २३ ॥ प्रदक्षिणक्रमंक्षेत्राद्बहिर्वाभ्यधनोधिका ॥ नियमस्यनभंगःस्याद्यथापापं
चनश्यति ॥ २४ ॥ देहिनांपापसंबंधःसर्वथाजायतेक्रमात् ॥ तत्काशिवासजंनश्येत्क्षेत्रसन्यासिनांयथा ॥ २५ ॥
॥ श्रीभगवानुवाच ॥ सम्यक्पृष्टंत्वयादेविमहाहंकारनाशनं ॥ प्रायश्चित्तंन्यासिनांहिक्षेत्राघौघविनाशनं ॥ २६ ॥ वि
धिस्तुपूर्वमेवोक्तोनियमादियुतस्तव ॥ प्रदक्षिणक्रमंतेषामवधारयसुव्रते ॥ २७ ॥ स्नात्वादेवंसमभ्यर्च्यविश्वे-
शंविश्वयासह ॥ मोदादिपंचकंढुंढिंदंडपाणिंचभैरवं ॥ २८ ॥ पूर्ववत्तीरगान्पूज्यदुर्गांपूज्यचयत्नतः ॥ बहिराव-
रणंत्यक्त्वागणेशानांचसप्तमं ॥ २९ ॥ मध्येप्रदक्षिणंकुर्यादसीवरुणयोःकृती ॥ सन्मुखीभूयविधिवत्पूज्यास्ये-
वामतस्थिताः ॥ ३० ॥ देवादेव्यश्चफलदाःक्षेत्रपालाःप्रयत्नतः ॥ एकरात्रंहिरात्रंवावसेन्न्यथवात्रिरात्रकं ॥ ३१ ॥ २
यत्रप्रद्वासुमहतीवसेत्तत्रनसंशयः ॥ प्रत्यहंदंडपाणेस्तुपूजाकार्याप्रयत्नतः ॥ ३२ ॥ दंडपाणेःपूजनेनसि

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

द्याभवतिनान्यथा। दंडपाणे यक्षपते क्षेत्रसंन्यासिवल्लभ ॥ ३३॥ पंचक्रोशस्य यात्रेयं सिद्धा मे त्वत्प्रसादतः ॥
अनेन श्लोकमंत्रेण प्रार्थना पूजनं स्मृतं ॥ ३४॥ प्रत्यहं कुर्वतां यात्रा संपूर्णा भवति ध्रुवं ॥ आगत्य विश्वनाथ
स्य पूजा कार्या तु पूर्ववत् ॥ ३५॥ देव्युवाच ॥ प्रत्यहं दंडपाणेस्तु पूजा प्रोक्ता विशेषतः ॥ किमेतद्वद देवेश यात्रा-
मुद्दिश्य शंकर ॥ ३६॥ महादेव उवाच ॥ काशीं प्राप्य बहिर्नैव गच्छेत्सर्वात्मना क्वचित् ॥ मन्मुखात्सम्यगाश्रुत्य क्षे
त्रसंन्यासकृत्तमः ॥ ३७॥ दंडपाणिः सभवत्तदारभ्य वरानने ॥ पुनः कालांतरे देवि ऋषिभिर्नारदादिभिः ॥ ३८॥ पृ-
ष्टोहं क्षेत्रजनितपापनाशनमुत्तमं ॥ सदा सुदुर्लभं देवि प्रायश्चित्तं तदा महत् ॥ ३९॥ उपदिष्टं महालिंगं प्रदक्षिण
मशेषतः ॥ तच्छ्रुत्वा पृष्टवान् दंडपाणिः क्षेत्रपरायणः ॥ ४०॥ तदा मयोपदिष्टोसौ महापाशुपतव्रती ॥ क्षेत्र
यात्रा द्वितीयेयं मयोक्ता दंडपाणये ॥ ४१॥ अतो दंडपतेः पूजा कर्तव्या पूर्तिकारिणी ॥ पंचक्रोशात्मकस्यैव लिं
गस्य परमात्मनः ॥ ४२॥ प्रदक्षिणमिदं कृत्वा जीवन्मुक्तो भवेन्नरः ॥ देव्युवाच ॥ ज्ञात्वापि श्रद्धया देव न कुर्व-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तिषदर्शिणं ॥ ४३॥ तत्केनहेतुनामर्त्याऽपेक्षतेमहाफलं ॥ महादेवउवाच ॥ श्रद्धाउप्पवतांदेवीनपांडि-
त्यादिभिश्चसा ॥४४॥ तस्माद्धर्मेप्रयततांसिध्येत्सर्वंनचान्यतः ॥ यत्रयत्रपरिरज्यतेजन्स्तत्रतत्रसुखमेधवै
उनः ॥४५॥ साधनानिविदथाविलस्करोषेनतत्फलमवाप्नुयान्नरः लौकिकेपरमवैदिकेथवापामरःपरमत
त्वविनथा ॥ ४६॥ मारकःपरममोदकोयथादीयतेकपटभार्ययायथा ॥ मोहितोनचविचारयत्ययंजीवनं
मरणमप्यहोवशी ॥ ४७॥ एवमेकंकालकूटंइंद्रियंसर्वनाशकृत् ॥ तदेवशोधितंयद्वद्विषमप्यमृतंभवेत् ॥
जगत्त्रणीहत्यसकालमृत्युंआत्मानमायोज्यशिवेनयोगैः ॥ अविघ्नमेवंस्वमलंविसृज्यशरीरसंज्ञंमल
खंडभांडं ॥ ४९॥ मुक्तोभवेदेषनचान्यथैवमर्त्यः प्रसादान्ममचैवमुक्तः ॥ कः कर्तुमेवंप्रभवत्सविघ्नंक-
लौमनुष्योबहुदोषयुक्तः ॥ ५०॥ अद्यापिमद्भक्तियुतोविमुक्तस्त्वद्भक्तियुक्तः सकलैस्वभावैः ॥ ह्वौदिना १८
दप्यतिदुःशाकोपंविमोहनार्थैरखिलैश्चशास्त्रैः ॥ ५१॥ बीभत्सितेद्दुर्विषयोकदाचियोवानुरागोभवितान

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

रस्य ॥ सचेद्विद्येत्परमात्मनीशो कोनाम मुक्तोन भवेद्भवाब्धेः ॥ ५२॥ अविमुक्तंमम क्षेत्रंअविमु-
क्तेश्वरंशिवं ॥ अविमुक्तजनंशंतं सेवंतेयेधृतव्रताः ॥ ५३॥ विमुक्ताः परमानन्देपदेस्थितिमुपा
गताः ॥ अनेकजन्मसुमहत्साधनैर्ज्ञानमुत्तमं ॥ ५४ ॥ प्राप्नुवंतितदैकेनजन्मनासाधुवासिनः॥
अष्टांगादिभिरन्यैश्चतपोयज्ञादिभिः सह ॥ ५५॥ साधितेपासिकीसिद्धिरविमुक्तेनिरर्गला ॥
अविमुक्तात्परोयोगोज्ञानंदानंजपस्तपः ॥ ५६॥ क्षेत्रतीर्थादिनियमानसंतिसुभदर्शिनां॥अ
विमुक्तंसमासाद्यनत्यजेन्मोक्षकामुकः ॥५७॥ क्षेत्रन्यासंदृढंकृत्वावसेद्धर्मपरः सदा ॥ क्षेत्र
न्यासपराणांत्वमहमप्यनुकूलजैः ॥५८॥ भोगैः सहायतांयातोदिशावः परमांगतिं ॥ यथापति
व्रतानारीभर्तारमनुगच्छति ॥५९॥ तथासाहसमालंब्यकाशीमनुगतोभवेत् ॥ गुरुद्रोहपरो-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पं॰मा॰ यस्तु विप्रद्रोहपरस्तथा ॥ ६० ॥ नतस्य काशीसिध्येत वहुभिः साधनैर्मुने ॥ क्षेत्रसन्यासिना मेवं
१९ क्रमः प्रोक्तो मयानघे ॥ ६१ ॥ प्रदक्षिणायास्तु महान्महापापहरः परः ॥ ६२ ॥ इतिश्रीब्रह्मवैव
र्तेमहापुराणेतृतीयविभागे पंचक्रोशीमहिमावर्णनंनाम पंचमोध्यायः ॥ ५ ॥ ॥
श्रीसम्वत् १९५२ वैशाख सुक्ल १ शुक्रवार को यह ग्रंथ शिलायंत्र मे छिपागया ॥
यहग्रंथ श्रीकाशीजीमें बंगाली साहू की आज्ञानुसार मानमन्दिर श्रीसत्यनारायणप्रेसमें
मुद्रित हुआ ॥ जिन्ह महाशय को लेना हो उन्हे श्रीकाशीजीमे ज्ञानवापी के उत्तर फाट
क पर लाइब्रेरी के सामह्ने श्रीसत्यनारायण यन्त्रालय के सम्पादक बंगाली साहू के दु- १९
कानपरमिलेगा ॥ ॥ ॥ ॥ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पंचक्रोशीमाहात्म्यकी सूचिका ॥ अध्याय

१ श्रीकाशीस्थ वापी कूप तड़ागादि जीर्णोद्धार माहात्म्य और श्रीगंगास्नान माहात्म्य ॥	१
२ क्षेत्रकृतपापप्रायश्चित्त विधान और श्रीविश्वेश्वरलिंगमाहात्म्य ॥	२
३ क्षेत्रपापप्रणाशन विधि ॥	३
४ क्षेत्रयात्रावास विधि और वास माहात्म्य ॥	४
५ पंचक्रोशयात्रा माहात्म्य अविमुक्तेश्वर माहात्म्य और अविमुक्त क्षेत्र माहात्म्य ॥	५

P.8

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पं॰मा॰
२०

॥ इति श्रीपञ्चक्रोशीमाहात्म्यं समाप्तम् ॥

घ
२०२

२०

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri